# 2018

## SANSKRIT

## [ Honours ]

## PAPER – I

*Full Marks* : 90

*Time* : 4 hours

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

1. यथेच्छमेका कारिका व्याख्येया— $6 \times 1$

(*a*) धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्तते ।
तमेव विशिनष्ट्यन्य उपसर्गगतिस्त्रिधा ।।

(*b*) सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ।।

2. यथेच्छं चतुष्टयस्य आत्मनेपद-परस्मैपदप्रत्ययविधानकारणं ससूत्रं निर्दिश्यताम्— 1×4

यजते, सेवते, विजयते, विरमति, भुनक्ति, व्यतिगच्छति, बोधयति ।

3. (*a*) यथेच्छं द्वितयस्य सन्धिकार्यं विधीयताम्— 1×2

लते एते, धावति अश्वे, श्रियै अर्थः, सः+अस्मिन् ।

(*b*) यथेच्छं द्वितयस्य विसन्धिरूपं लेख्यम्— 1×2

पतञ्जलिः, कर्तुरीप्सिततमम्, गवेन्द्रः, मनीषा ।

4. अधःस्थितेषु रेखालाञ्छितेषु पदेषु चतुष्टयस्य ससूत्रं सकारण-विभक्तिनिर्देशः कर्तव्यः— 1×4

(*a*) वैशाखात् परं ज्यैष्ठमासो भवति ।

(*b*) हर हर मे दुरितम् ।

(*c*) यानेषु विमानयानम् त्वरितगतिशीलम् ।

(*d*) ब्राह्मणेन सोमलता यागस्थलं नीयते ।

(*e*) आवाभ्यां फलद्वयं भुक्तम् ।

(*f*) वेतनेन लुनाति ।

5. केवलं प्रत्ययविधायकं सूत्रमुल्लिख्य यथेच्छं द्वयोः परिनिष्ठितं रूपं लेख्यम्— 2×2

(*a*) अर्जुन + इञ्

(*b*) दृश् + सन् + लट् मिप्

(*c*) गम् + यङ् + लट् झि

(*d*) गो + मतुप्

6. यथेच्छं चतुष्टयस्य एकपदीकरणं विधेयम्— 1×4

आत्मानं राजानमिच्छति, नमः करोति, कन्यायाः अपत्यं पुमान्, पुनः पुनः पश्यामि, अन्तिकं करोति, मनोः शिष्याः ।

7. यथेच्छं द्वितयस्य सविग्रहसमासनाम लेखम्— 2×2

पीताम्बरः, पारेगङ्गम्, दुर्भिक्षम्, त्रिभुवनम्, नरसिंहः ।

8. "स्थास्नुं रणे स्मेरमुखो जगाद
मारीचमुच्चैर्वचनं महार्थम् ॥"
—इत्यत्र को मारीचः ? तं प्रति कः स्मेरमुखो जगाद ? कीदृशं महार्थं वचनं गदितमिति यथापद्यं गद्यम् । 1+1+8

*अथवा*

भट्टिकाव्यस्य रचनावैशिष्ट्यं द्वितीयसर्गमवलम्ब्य प्रतिपाद्यताम् । 10

**9.** सरलसुरगिरा देवनागरलिप्या च यथेच्छमेकस्य व्याख्यानं विधीयताम् — 6 × 1

(*a*) महीय्यमाना भवतातिमात्रं सुराध्वरे घस्मरजित्वरेण ।
दिवोऽपि वज्रायुधभूषणाया ह्रिणीयते वीरवती न भूमि: ।।

(*b*) तरङ्गसङ्गाच्चपलै: पलाशैर्ज्वालाश्रियं सातिशयं दधन्ति ।
सधूमदीप्ताग्निरुचीनि रेजुस्ताम्रोत्पलान्याकुलषट्पदानि ।।

**10.** सरलसुरगिरा देवनागरलिप्या च यथेच्छं प्रश्नचतुष्टयं समाधेयम् — 1 × 4

(*a*) "तं विप्रदर्शं कृतघातयत्ना यान्तं वने रात्रिचरी डुढौके" — इत्यत्र का रात्रिचरीरूपेणोल्लिखिता ?

(*b*) कस्मिन् ऋतौ रामलक्ष्मणौ वनं जग्मतु: ?

(*c*) क: विश्वामित्र: ?

(*d*) "लतानुपातं कुसुमान्यगृह्णात्" — इत्यत्र लतानु पातमिति पदस्य व्युत्पत्ति: प्रदर्श्यताम् ।

(*e*) "काकुत्स्थ ईषत् स्मयमात आस्त" — रामचन्द्र: काकुत्स्थ: इति कथमुच्यते ?

(*f*) "न तज्जलं यन्न सुचारुपङ्कजं न पङ्कजं तद्यदलीनषट्पदम् ।
न षट्पदोऽसौ न जुगुञ्ज य: कलं न गुञ्जितं तन्न जहार यन्मन: ।।

— इत्यत्र कोऽलंकार: ?

11. (*a*) उद्धृतपूर्वश्लोकस्थानामधोधृतानां पदानां यथेच्छं द्वितयस्य प्रकृतिप्रत्ययनिरूपणं विधेयम् — 1×2

रेजुः, ह्रिणीयते, महीय्यमाना ।

(*b*) सविग्रहसमासनाम लेख्यमेकस्य — 2×1

वज्रायुधभूषणायाः, तरङ्गसङ्गात् ।

(*c*) विसन्धिरूपं लेख्यमेकस्य — 1×1

दिवोऽपि, ताम्रोत्पलान्याकुलषट्पदानि ।

12. छन्दोमञ्जरीग्रन्थानुसारं यथेच्छं द्वितयस्य सोदाहरणं लक्षणं प्रतिपाद्यताम् — 5×2

उपजातिः, मालिनी, शालिनी, भुजङ्गप्रयातम् ।

13. अधोलिखितयोः यथेच्छमेकस्य छन्दो निरूप्यताम् सलक्षणम् — 5×1

(*a*) वासांसि जीर्णानि यथा विहाय ।

(*b*) यातो हरिः स मथुरां विधिना हताः स्मः ।

14. सरलसुरगिरा देवनागरलिप्या चानूद्यताम् (कस्यचिदेकस्य) — 10×1

(*a*) স্বামী বিবেকানন্দ তাঁর গুরু রামকৃষ্ণদেবের একজন যথার্থ শিষ্য ছিলেন । তিনি অনুভব করেছিলেন যে, পরম সত্য

একটিই। সুতরাং আমাদের মধ্যে কোনো ভেদ নেই। তিনি এই বার্তাটি প্রাচ্য থেকে পাশ্চাত্যে বহন করেছিলেন। তিনি বলেছিলেন যে, ঈশ্বর আমাদের মধ্যে নানা রূপে বিরাজ করেন। তিনি ঘোষণা করেছিলেন যে, তিনি একাই ঈশ্বরকে সেবা করেন, যিনি সকলকে ভালোবাসেন। এটিই ধর্মের চরম শিক্ষা।

Swami Vivekananda was a true disciple of his preceptor, Ramakrishnadeva. He realised that ultimate truth is one. So, there is no difference among us. He carried this message from East to West. He said that God exists within us in various forms. He announced that he alone serves God who loves all. This is the highest lesson of religion.

(*b*) একটি কুকুর নদীর পার্শ্বস্থ পথ ধরে একখণ্ড মাংসের টুকরো তার মুখে নিয়ে যাচ্ছিল। তখন সে নদীর জলে তার প্রতিবিম্ব খুঁজে পেল এবং সে নিজেকে ভাবল সেখানে অন্য একটি কুকুর মাংসের খণ্ড নিয়ে যাচ্ছে। তখন লোভবশতঃ মাংসের সেই টুকরোটি সে পেতে জলে ঝাঁপ দিয়েছিল এবং জলের স্রোতে ভেসে গিয়েছিল।

A dog was going along the riverside way with a piece of meat in his mouth. He then found his image in the water of the river and

thought to himself you ! there was another dog going with a piece of meat. Then out of greed he wanted to have that piece of meat and jumped into the water. He was carried away by the current of the water.

15. सुरगिरा देवनागरलिप्या च प्रबन्ध एको यथेच्छं विरचनीयः — 10 × 1

(*a*) वङ्गेषु ऋतुपरिवर्तनम् ।

(*b*) विमुद्रीकरणम् ।

(*c*) भगिनी निवेदिता ।

---